# Natya Shastra Chapter 3

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ 3

## Document Information

Text title : naaTyashaastra adhyaaya 3

File name : natya03.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : May 24, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Natya Shastra Chapter 3

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ તૃતીયોધ્યાયઃ ।
સર્વલક્ષણસંપન્ને કૃતે નાટ્યગૃહે શુભે ।
ગાવો વસેયુઃ સપ્તાહં સહ જપ્યપરૈર્દ્વિજૈઃ ॥ ૧॥

તતોઽધિવાસયેદ્વેશ્મ રઙ્ગપીઠં તથૈવ ચ ।
મન્ત્રપૂતેન તોયેન પ્રોક્ષિતાઙ્ગો નિશાગમે ॥ ૨॥

યથાસ્થાનાન્તરગતો દીક્ષિતઃ પ્રયતઃ શુચિઃ ।
ત્રિરાત્રોપોષિતો ભૂત્વા નાટ્યાચાર્યોઽહતામ્બરઃ ॥ ૩॥

નમસ્કૃત્ય મહાદેવં સર્વલોકોદ્ભવં ભવમ્ ।
જગત્પિતામહં ચૈવ વિષ્ણુમિન્દ્રં ગુહં તથા ॥ ૪॥

સરસ્વતીં ચ લક્ષ્મીં ચ સિદ્ધિં મેધાં ધૃતિં સ્મૃતિમ્ ।
સોમં સૂર્યં ચ મરુતો લોકપાલાંસ્તથાશ્વિનૌ ॥ ૫॥

મિત્રમગ્નિં સુરાન્વર્ણાન્ રુદ્રાન્કાલં કલિં તથા ।
મૃત્યું ચ નિયતિં ચૈવ કાલદણ્ડં તથૈવ ચ ॥ ૬॥

વિષ્ણુપ્રહરણં ચૈવ નાગરાજં ચ વાસુકિમ્ ।
વજ્રં વિદ્યુત્સમુદ્રાંશ્ચ ગન્ધર્વાપ્સરસો મુનીન્ ॥ ૭॥

ભૂતાન્ પિશાચાન્ યક્ષાંશ્ચ ગુહ્યકાંશ્ચ મહેશ્વરાન્ ।
અસુરાન્નાટ્યવિઘ્નાંશ્ચ તથાઽન્યાન્દૈત્યરાક્ષસાન્ ॥ ૮॥

તથા નાટ્યકુમારીશ્ચ મહાગ્રામણ્યમેવ ચ ।
યક્ષાંશ્ચ ગુહ્યકાંશ્ચૈવ ભૂતસઙ્ઘાસ્તથૈવ ચ ॥ ૯॥

એતાંશ્ચાન્યાંશ્ચ દેવર્ષીન્પ્રણમ્ય રચિતાઞ્જલિઃ ।

યથાસ્થાનાન્તરગતાન્સમાવાહ્ય તતો વદેત્ ॥ ૧૦॥

ભવદ્ભિર્નો નિશાયાં તુ કર્તવ્યઃ સમ્પરિગ્રહઃ ।
સાહાય્યં ચૈવ દાતવ્યમસ્મિન્નાટ્યે સહાનુગૈઃ ॥ ૧૧॥

સમ્પૂજ્ય સર્વાનેકત્ર કુતપં સમ્પ્રયુજ્ય ચ ।
જર્જરાય પ્રયુઞ્જીત પૂજાં નાટ્યપ્રસિદ્ધયે ॥ ૧૨॥

ત્વં મહેન્દ્રપ્રહરણં સર્વદાનવસૂદનમ્ ।
નિર્મિતસ્સર્વદેવૈશ્ચ સર્વવિઘ્નનિબર્હણ ॥ ૧૩॥

નૃપસ્ય વિજયં શંસ રિપૂણાં ચ પરાજયમ્ ।
ગોબ્રાહ્મણશિવં ચૈવ નાટ્યસ્ય ચ વિવર્ધનમ્ ॥ ૧૪॥

એવં કૃત્વા યથાન્યાયમુપાસ્યં નાટ્યમણ્ડપે ।
નિશાયાં તુ પ્રભાતાયાં પૂજનં પ્રક્રમેદિહ ॥ ૧૫॥

આર્દ્રાયાં વા મઘાયાં વા યામ્યે પૂર્વેષુ વા ત્રિષુ ।
આશ્લેષામૂલયોર્વાપિ કર્તવ્યં રઙ્ગપૂજનમ્ ॥ ૧૬॥

આચાર્યેણ તુ યુક્તેન શુચિના દીક્ષિતેન ચ ।
રઙ્ગસ્યોદ્યોતનં કાર્યં દેવતાનાં ચ પૂજનમ્ ॥ ૧૭॥

દિનાન્તે દારુણે ઘોરે મુહૂર્તે યમદૈવતે ।
આચમ્ય તુ યથાન્યાયં દેવતા વૈ નિવેશયત્ ॥ ૧૮॥

રક્તાઃ પ્રતિસરાઃ સૂત્રં રક્તગન્ધાશ્ચ પૂજિતાઃ ।
રક્તાઃ સુમનસશ્ચૈવ યચ્ચ રક્તં ફલં ભવેત્ ॥ ૧૯॥

યવૈસ્સિદ્ધાર્થકૈર્લાજૈરક્ષતૈઃ શાલિતણ્ડુલૈઃ ।
નાગપુષ્પસ્ય ચૂર્ણેન વિતુષાભિઃ પ્રિયઙ્ગુભિઃ ॥ ૨૦॥

એતૈર્દ્રવ્યૈર્યુતં કુર્યાદ્દેવતાનાં નિવેશનમ્ ।
આલિખેન્મણ્ડલં પૂર્વં યથાસ્થાનં યથાવિધિઃ ॥ ૨૧॥

સમન્તતસ્તશ્ચ કર્તવ્યં હસ્તા ષોડશ મણ્ડલમ્ ।
દ્વારાણિ ચાત્ર કુર્વીત વિધાનેન ચતુર્દિશમ્ ॥ ૨૨॥

મધ્યે ચૈવાત્ર કર્તવ્યે દ્વે રેખે તિર્યગૂર્ધ્વગે ।
તયોઃ કક્ષ્યાવિભાગેન દૈવતાનિ નિવેશયત્ ॥ ૨૩॥

પદ્મોપવિષ્ટં બ્રહ્માણં તસ્ય મધ્યે નિવેશયેત્ ।
આદૌ નિવેશ્યો ભગવાન્સાર્ધં ભૂતગણૈઃ શિવઃ ॥ ૨૪॥

નારાયણો મહેન્દ્રશ્ચ સ્કન્દઃ સૂર્યોઽશ્વિનૌ શશી ।
સરસ્વતી ચ લક્ષ્મીશ્ચ શ્રદ્ધા  મેધા ચ પૂર્વતઃ ॥ ૨૫॥

પૂર્વદક્ષિણતો વહ્નિર્નિવેશ્યઃ સ્વાહયા સહ ।
વિશ્વેદેવાઃ સગન્ધર્વા રુદ્રાઃ સર્પગણાસ્તથા ॥ ૨૬॥

દક્ષિણેન નિવેશ્યસ્તુ યમો મિત્રશ્ચ સાનુગઃ ।
પિતૄન્પિશાચાનુરગાન્ ગુહ્યકાંશ્ચ નિવેશયત્ ॥ ૨૭॥

નૈરૃત્યાં રાક્ષસાંશ્ચૈવ ભૂતાનિ ચ નિવેશયત્ ।
પશ્ચિમાયાં સમુદ્રાંશ્ચ વરુણં યાદસાં પતિમ્ ॥ ૨૮॥

વાયવ્યાયાં દિશિ તથા સપ્ત વાયૂન્નિવેશયેત્ ।
તત્રૈવ વિનિવેશ્યસ્તુ ગરુડઃ પક્ષિભિઃ સહ ॥ ૨૯॥

ઉત્તરસ્યાં દિશિ તથા ધનદં સંનિવિએશયેત્ ।
નાટ્યસ્ય માતૄશ્ચ તથા યક્ષાનથ સગુહ્યકાન્ ॥ ૩૦॥

તથૈવોત્તરપૂર્વાયાં નન્દ્યાદ્યાંશ્ચ ગણેશ્વરાન્ ।
બ્રહ્મર્ષિભૂતસંઘાંશ્ચ યથાભાગં નિવેશયત્ ॥ ૩૧॥

સ્તમ્ભે સનત્કુમારં તુ દક્ષિણે દક્ષમેવ ચ ।
ગ્રામણ્યમુત્તરે સ્તમ્ભે પૂજાર્થં સંનિવિશયેત્ ॥ ૩૨॥

અનેનૈઅવ વિધાનેન યથાસ્થાનં યથાવિધિ ।
સુપ્રસાદાનિ સર્વાણિ દૈવતાનિ નિવેશયત્ ॥ ૩૩॥

સ્થાને સ્થાને યથાન્યાયં વિનિવેશ્ય તુ દેવતાઃ ।
તાસાં પ્રકુર્વીત તતઃ પૂજનં તુ યથાર્હતઃ ॥ ૩૪॥

દેવતાભ્યસ્તુ દાતવ્યં સિતમાલ્યાનુલેપનમ્ ।
ગન્ધર્વવહ્નિસૂર્યોભ્યો રક્તમાલ્યાનુલેપનમ્ ॥ ૩૫॥

ગન્ધં માલ્યં ચ ધૂપં ચ યથાવદનુપૂર્વશઃ ।
દત્વા તતઃ પ્રકુર્વીત બલિં પૂજાં યથાવિધિઃ ॥ ૩૬॥

બ્રહ્માણં મદુકર્પેણ પાયસેન સરસ્વતીમ્ ।
શિવવિષ્ણુમહેન્દ્રાદ્યાઃ સમ્પૂજ્યા મોદકૈરથ ॥ ૩૭॥

ધૃતૌદનેન હુતભુક્સોમર્કો તુ ગુડૌદનૈઃ ।
વિશ્વેદેવાઃ સગન્ધર્વા મુનયો મધુપાયસૈઃ ॥ ૩૮॥

યમમિત્રૌ ચ સમ્પૂજ્યાવપૂપૈર્મોદકૈસ્તથા ।
પિતૄન્પિશાચાનુરગાન્ સર્પિઃક્ષીરેણ તર્પયેત્ ॥ ૩૯॥

પક્વાનેન તુ માંસેન સુરાસીથુફલાસવૈઃ ।
અર્ચયેદ્ભૂતસંઘાંશ્ચ ચણકૈઃ પલલાપ્લુતૈઃ ॥ ૪૦॥

અનેનૈવ વિધાનેન સમ્પૂજ્યા મત્તવારણી ।
પક્વામેન તુ માંસેન સમ્પૂજ્યા રક્ષસાં ગણાઃ ॥ ૪૧॥

સુરામાંસપ્રદાનેઅન દાનવાન્પ્રતિપૂજયેત્ ।
શેષાન્દેવગણાંસ્તજ્જ્ઞઃ સાપૂપોત્કારિકૌદનૈઃ ॥ ૪૨॥

મત્સ્યૈશ્ચ પિષ્ટભક્ષ્યૈશ્ચ સાગરાન્સરિતસ્તથા ।
સમ્પૂજ્ય વરુણં ચાપિ દાતવ્યં ધૃતપાયસમ્ ॥ ૪૩॥

નાનાકૂલફલશ્ચાપિ મુનીન્સમ્પ્રતિપૂજયેત્ ।
વાયૂંશ્ચ પક્ષિણશ્ચૈવ વિચિત્રૈર્ભક્ષ્યભોજનૈઃ ॥ ૪૪॥

માતૄર્નાટ્યસ્ય સર્વાસ્તા ધનદં ચ સહાનુગૈઃ ।
અપૂપૈર્લાજિકામિશ્રૈર્ભક્ષ્યભોજ્યૈશ્ચ પૂજયેત્ ॥ ૪૫॥

એવમેષાં બલિઃ કાર્યો નાનાભોજનસંશ્રયઃ ।
પુનર્મન્ત્રવિધાનેન બલિકર્મ ચ વક્ષ્યતે ॥ ૪૬॥

દેવદેવ મહાભાગ સર્વલોકપિતામહ ।
મન્ત્રપૂતમિમં સર્વં પ્રતિગૃહ્ણીષ્વ મે બલિમ્ ॥ ૪૭॥

દેવદેવ મહાભાગ ગણેશ ત્રિપુરાન્તક ।
પ્રગૃહ્યતાં બલિર્દેવ મન્ત્રપૂતો મયોદ્યતઃ ॥ ૪૮॥

નારાયણામિતગતે પદ્મનાભ સુરોત્તમ ।
પ્રગૃહ્યતાં બલિર્દેવ મન્ત્રપૂતો મયાર્પિતઃ ॥ ૪૯॥

પુરન્દરામરપતે વજ્રપાણે શતક્રતો ।
પ્રગૃહ્યતાં બલિર્દેવ વિધિમન્ત્રપુરસ્કૃતઃ ॥ ૫૦॥

દેવસેનાપતે સ્કન્દ ભગવન્ શઙ્કરપ્રિય ।

બલિઃ પ્રીતેન મનસા ષણ્મુખ પ્રતિગૃહ્યતામ્ ॥ ૫૧॥

(મહાદેવ મહાયોગિન્દેવદેવ સુરોત્તમ ।
સંપ્રગૃહ્ય બલિં દેવ રક્ષ વિઘ્નાત્સદોત્થિતાત્ ॥ )
દેવિ દેવમહાભાગે સરસ્વતિ હરિપ્રિયે ।
પ્રગૃહ્યતાં બલિર્માતર્મયા ભક્ત્યા સમર્પિતઃ ॥ ૫૨॥

નાનાનિમિત્તસમ્ભૂતાઃ પૌલસ્ત્યાઃ સર્વ એવ તુ
રાક્ષસેન્દ્રા મહાસત્વાઃ પ્રતિગૃહ્ણીત મે બલિમ્ ॥ ૫૩॥

લક્ષ્મીઃ સિદ્ધિર્મતિર્મેધા સર્વલોકનમસ્કૃતાઃ ।
મન્ત્રપૂતમિમં દેવ્યઃ પ્રતિગૃહ્ણન્તુ મે બલિમ્ ॥ ૫૪॥

સર્વભૂતાનુભાવજ્ઞ લોકજીવન મારુત ।
પ્રગૃહ્યતાં બલિર્દેવ મન્ત્રપૂતો મયોદ્યતઃ ॥ ૫૫॥

દેવવક્ત્ર સુરશ્રેષ્ઠ ધૂમકેતો હુતાશન ।
ભક્ત્યા સમુદ્યતો દેવ બલિઃ સમ્પ્રતિ ગૃહ્યતામ્ ॥ ૫૬॥

સર્વગ્રહાણાં પ્રવર તેજોરાશે દિવાકર ।
ભક્ત્યા મયોદ્યતો દેવ બલિઃ સમ્પ્રતિ ગૃહ્યતામ્ ॥ ૫૭॥

સર્વગ્રહપતે સોમ દ્વિજરાજ જગત્પ્રિય ।
પ્રગૃહ્યતામેષ બલિર્મન્ત્રપૂતો મયોદ્યતઃ ॥ ૫૮॥

મહાગણેશ્વરાઃ સર્વે નન્દીશ્વરપુરોગમાઃ ।
પ્રગૃતાં બલિર્ભક્ત્યા મયા સમ્પ્રતિ ચોદિતઃ ॥ ૫૯॥

નમઃ પિતૃભ્યઃ સર્વેભ્યઃ પ્રતિગૃહ્ણન્ત્વિમં બલિમ્ ।
(ભૂતેભ્યશ્ચ નમો નિત્યં યેષામેષ બલિઃ પ્રિયઃ ।)
કામપાલ નમો નિત્યં યસ્યાયં તે વિધિઃ કૃતઃ ॥ ૬૦॥

નારદસ્તુમ્બરુશ્ચૈવ વિશ્વાવસુપુરોગમાઃ ।
પરિગૃહ્ણન્તુ મે સર્વે ગન્ધર્વા બલિમુદ્યતમ્ ॥ ૬૧॥

યમો મિત્રશ્ચ ભગવાનીશ્વરૌ લોકપૂજિતૌ ।
ઇમં મે પ્રતિગૃહ્ણીતાં બલિઃ મન્ત્રપુરસ્કૃતમ્ ॥ ૬૨॥

રસાતલગતેભ્યશ્ચ પન્નગેભ્યો નમો નમઃ ।
દિશન્તુ સિદ્ધિં નાટ્યસ્ય પૂજિતાઃ પાપનાશનાઃ ॥ ૬૩॥

સર્વામ્ભસાં પતિર્દેવો વરુણો હંસવાહનઃ ।
પૂજિતઃ પ્રીતમાનસ્તુ સસમુદ્રનદીનદઃ ॥ ૬૪॥

વૈનતેય મહાસત્વ સર્વપક્ષિપતે વિભો ।
પ્રગૃહ્યતાં બલિર્દેવ મન્ત્રપૂતો મયોદ્યતઃ ॥ ૬૫॥

ધનાધ્યક્ષો યક્ષપતિર્લોકપાલો ધનેશ્વરઃ ।
સગુહ્યકસ્સયક્ષશ્ચ પ્રતિગૃહ્ણાતુ મે બલિમ્ ॥ ૬૬॥

નમોઽસ્તુ નાટ્યમાતૃભ્યો બ્રાહ્મ્યાદ્યાભ્યો નમોનમઃ ।
સુમુખીભિઃ પ્રસન્નાભિર્બલિરદ્ય પ્રગૃહ્યતામ્ ॥ ૬૭॥

રુદ્રપ્રહરણં સર્વં પ્રતિગૃહ્ણાતુ મે બલિમ્ ।
વિષ્ણુપ્રહરણં ચૈવ વિષ્ણુભક્ત્યા મયોદ્યતમ્ ॥ ૬૮॥

તથા કૃતાન્તઃ કાલશ્ચ સર્વપ્રાણિવધેશ્વરૌ ।
મૃત્યુશ્ચ નિયતિશ્ચૈવ પ્રતિગૃહ્ણાતુ મે બલિમ્ ॥ ૬૯॥

યાશ્ચાસ્યાં મત્તવારણ્યાં સંશ્રિતા વસ્તુદેવતાઃ ।
મન્ત્રપૂતમિમં સમ્યક્પ્રતિગૃહ્ણન્તુ મે બલિમ્ ॥ ૭૦॥

અન્યે યે દેવગન્ધર્વા દિશો દશ સમાશ્રિતાઃ ।
દિવ્યાન્તરિક્ષાભૌમાશ્ચ તેભ્યશ્ચાયં બલિઃ કૃતઃ ॥ ૭૧॥

કુમ્ભં સલિલસમ્પૂર્ણં પુષ્પમાલાપુરસ્કૃતમ્ ।
સ્થાપયેદ્રઙ્ગમધ્યે તુ સુવર્ણં ચાત્ર દાપયેત્ ॥ ૭૨॥

(આતોદ્યાનિ તુ સર્વાણિ કૃત્વા વસ્ત્રોત્તરાણિ તુ ।
ગન્ધૈર્માલ્યૈશ્ચ ધૂપૈશ્ચ ભક્ષ્યૈર્ભોજ્યૈશ્ચ પૂજયેત્ ॥

પૂજયિત્વા તુ સર્વાણિ દૈવતાનિ યથાક્રમમ્ ।
જર્જરસ્ત્વભિસમ્પૂજ્યઃ સ્યાત્તતો વિઘ્નજર્જરઃ ॥ ૭૩॥

શ્વેતં શિરસિ વસ્ત્રં સ્યાન્નીલં રૌદ્રે ચ પર્વણિ ।
વિષ્ણુપર્વણિ વૈ પીતં રક્તં સ્કન્દસ્ય પર્વણિ ॥ ૭૪॥

મૃડપર્વણિ ચિત્રં તુ દેયં વસ્ત્રં હિતાર્થિના ।
સદૃશં ચ પ્રદાતવ્યં ધૂપમાલ્યાનુલેપનમ્ ॥ ૭૫॥

આતોદ્યાનિ તુ સર્વાણિ વાસોભિરવગુણ્ઠયેત્ ।
ગન્ધૈર્માલ્યૈશ્ચ ધૂપૈશ્ચ ભક્ષ્યભોજૈશ્ચ પૂજયેત્ ॥ ૭૬॥

સર્વમેવં વિધિં કૃત્વા ગન્ધમાલ્યાનુલેપનૈઃ ।
વિઘ્નજર્જરણાર્થં તુ જર્જરં ત્વભિમન્ત્રયેત્ ॥ ૭૭॥

અત્ર વિઘ્નવિનાશાર્થં પિતામહમુખૈસ્સુરૈઃ ।
નિર્મિતસ્ત્વં મહાવીર્યો વજ્રસારો મહાતનુઃ ॥ ૭૮॥

શિરસ્તે રક્ષતુ બ્રહ્મા સર્વૈર્દેવગુણૈઅઃ તહ ।
દ્વિતીયં ચ હરઃ પર્વ તૃતીયં ચ જનાર્દનઃ ॥ ૭૯॥

ચતુર્થં ચ કુમારસ્તે પઞ્ચમં પન્નગોત્તમઃ ।
નિત્યં સર્વેऽપિ પાન્તુ ત્વાં સુરાર્થે ચ શિવો ભવ ॥ ૮૦॥

નક્ષત્રેऽભિજિતિ ત્વં હિ પ્રસૂતોऽહિતસૂદન ।
જયં ચાભ્યુદયં ચૈવ પાર્થિવસ્ય સમાવહ ॥ ૮૧॥

જર્જરં પૂજયિત્વૈઅવં બલિં સર્વં નિવિદ્ય ચ ।
અગ્નૌ હોમં  તતઃ કુર્યાન્મન્ત્રાહુઇતિપુરસ્કૃતમ્ ॥ ૮૨॥

હુતાશ એવ દીપ્તાભિરુલ્કાભિઃ પરિમાર્જનમ્ ।
નૃપતેર્નર્તકીનાં ચ કુર્યાદ્દીપ્ત્યભિવર્ધનમ્ ॥ ૮૩॥

અભિદ્યોત્ય સહાતોદ્યૈર્નૃપતિં નર્તકીસ્તથા ।
મન્ત્રપૂતેન તોયેન પુનરભ્યુક્ષ્ય તાન્વદેત્ ॥ ૮૪॥

મહાકુલે પ્રસૂતાઃ સ્થ ગુણૌઘૈશ્ચાપ્યલઙ્કૃતાઃ ।
યદ્વો જન્મગુણોપેતં તદ્વો ભવતુ નિત્યશઃ ॥ ૮૫॥

એવમુક્ત્વા તતો વાક્યં નૃપતેર્ભૂતયે બુધઃ ।
નાટ્યયોગપ્રસિદ્ધ્યર્થમાશિષસ્સમ્પ્રયોજયેત્ ॥ ૮૬॥

સરસ્વતી ધૃતિર્મેધા હ્રીઃ શ્રીર્લક્ષ્મીસ્સ્મૃતિર્મતિઃ ।
પાન્તુ વો માતરઃ સૌમ્યાસ્સિદ્ધિદાશ્ચ ભવન્તુ વઃ ॥ ૮૭॥

હોમં કૃત્વા યથાન્યાયં હવિર્મન્ત્રપુરસ્કૃતમ્ ।
ભિન્દ્યાત્કુમ્ભં તતશ્ચૈવ નાટ્યાચાર્યઃ પ્રયત્નતઃ ॥ ૮૮॥

અભિન્ને તુ ભવેત્કુમ્ભે સ્વામિનઃ શત્રુતો ભયમ્ ।
ભિન્ને ચૈવ તુ વિજ્ઞેયઃ સ્વામિનઃ શત્રુસંક્ષયઃ ॥ ૮૯॥

ભિન્ને કુમ્ભે તતશ્ચૈવ નાટ્યચાર્યઃ પ્રયત્નતઃ ।

પ્રગૃહ્ય દીપિકાં દીપ્તાં સર્વં રઙ્ગં પ્રદીપયેત્ ॥ ૯૦॥

ક્ષ્વેડિતૈઃ સ્ફોટિતૈશ્ચૈવ વલ્ગિતૈશ્ચ પ્રધાવિતૈઃ ।
રઙ્ગમધ્યે તુ તાં દીપ્તાં સશબ્દાં સમ્પ્રયોજયેત્ ॥ ૯૧॥

શઙ્ખદુન્દુભિનિર્ઘોષૈર્મૃદઙ્ગપણવૈસ્તથા ।
સર્વાતોદ્યૈઃ પ્રણદિતૈ રઙ્ગે યુદ્ધાનિ કારયેત્ ॥ ૯૨॥

તત્ર ચ્છિન્નં વ ભિન્નં ચ દારિતં ચ સશોણિતમ્ ।
ક્ષતં પ્રદીપ્તમાયસ્તં નિમિત્તં સિદ્ધિલક્ષણમ્ ॥ ૯૩॥

સમ્યગિષ્ટસ્તુ રઙ્ગો વૈ સ્વામિનઃ શુભમાવહેત્ ।
પુરસ્યાબાલવૃદ્ધસ્ય તથા જાનપદસ્ય ચ ॥ ૯૪॥

દુરિષ્ટસ્તુ તથા રઙ્ગો દૈવતૈર્દુરધિષ્ઠિતઃ ।
નાટ્યવિધ્વસનં કુર્યાન્નૃપસ્ય ચ તથાઽશુભમ્ ॥ ૯૫॥

ય એવં વિધિમુત્સૃજ્ય યથેષ્ટં સમ્પ્રયોજયેત્ ।
પ્રાપ્નોત્યપચયં શીઘ્રં તિર્યગ્યોનિં ચ ગચ્છતિ ॥ ૯૬॥

યજ્ઞેન સમ્મિતં હ્યેતદ્રઙ્ગદૈવતપૂજનમ્ ।
અપૂજયિત્વા રઙ્ગં તુ નૈવ પ્રેક્ષાં પ્રયોજયેત્ ॥ ૯૭॥

પૂજિતાઃ પૂજયન્ત્યેતે માનિતા માનયન્તિ ચ ।
તસ્માત્સર્વપ્રયત્નેન કર્તવ્યં રઙ્ગપૂજનમ્ ॥ ૯૮॥

ન તથા પ્રદહત્યગ્નિઃ  પ્રભઞ્જનસમીરિતઃ ।
યથા હ્યપપ્રયોગસ્તુ પ્રયુક્તો દહતિ ક્ષણાત્ ॥ ૯૯॥

શાસ્ત્રજ્ઞેન વિનીતેન શુચિના દીક્ષિતેન ચ ।
નાટ્યાચાર્યેણ શાન્તેન કર્તવ્યં રઙ્ગપૂજનમ્ ॥૧૦૦॥

સ્થાનભ્રષ્ટં તુ યો દદ્યાદ્બલિમુદ્વિગ્નમાનસઃ ।
મન્ત્રહીનો યથા હોતા પ્રાયશ્ચિત્તી ભવેત્તુ સઃ ॥ ૧૦૧॥

ઇત્યયં યો વિધિર્દૃષ્ટો રઙ્ગદૈવતપૂજને ।
નવે નાટ્યગૃહે કાર્યઃ પ્રેક્ષાયાં ચ પ્રયોક્તૃભિઃ ॥ ૧૦૨॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે રઙ્ગદૈવતપૂજનં  નામ તૃતીયોઽધ્યાયઃ સમાપ્તઃ  ।

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 3*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*